मोहान्तसुरतक्षमा, यथा

श्रमजलनिविडां निमीलिताक्षीं
श्लथचिकुरामनधीनबाहुवल्लीम् ।
मुदितमनसमस्मृतान्यभावां
रतिशयने निशि गोपिकां स्मरामि॥ ३१॥

माने कोमला, यथा

प्राणास्त्वमेव किमिव त्वयि गोपनीयं
मानाय केशिमथने सखि नास्मि शक्ता ।
एहि प्रयाव रविजातटनिष्कुटाय
कल्याणि फुल्लकुसुमावचयच्छलेन॥ ३२॥

माने कर्कशा, यथा विदग्धमाधवे (५.३०)

मुधा मानोन्नाहाद्ग्लपयसि किमङ्गानि कठिने
रुषं धत्से किंवा प्रियपरिजनाभ्यर्थनविधौ ।
प्रकामं ते कुञ्जालयगृहपतिस्ताम्यति पुरः
कृपालक्ष्मीवन्तं चटुलय दृगन्तं क्षणमिह॥ ३३॥

त्रिधासौ मानवृत्तेः स्याद्धीराधीरोभयात्मिका॥ ३४॥